# Aryataranamaskaraikavimshati Stotram

# આર્યતારાનમસ્કારૈકવિંશતિસ્તોત્રમ્

## Document Information

Text title : Aryataranamaskaraikavimshati Stotram

File name : AryatArAnamaskAraikaviMshatistotram.itx

Category : devii, devI, buddha, stotra, viMshati

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# આર્યતારાનમસ્કારૈકવિંશતિસ્તોત્રમ્

ૐ નમો ભગવત્યૈ આર્યશ્રી-એકવિંશતિતારાયૈ ।
નમસ્તારે તુરે વીરે ક્ષણદ્યુતિનિભેક્ષણે ।
ત્રૈલોક્યનાથવક્ત્રાબ્જવિકસત્કમલોદ્ભવે ॥ ૧॥

નમઃ શતશરચ્ચન્દ્રસમ્પૂર્ણેવ વરાનને ।
તારાસહસ્રકિરણૈઃ પ્રહસત્કિરણોજ્જ્વલે ॥ ૨॥

નમઃ કનકનીલાબ્જપાણિપદ્મવિભૂષિતે ।
દાનવીર્યતપઃશા(ક્ષા)ન્તિતિતિક્ષાધ્યાનગોચરે ॥ ૩॥

નમસ્તથાગતોષ્ણીષવિજયાનન્તચારિણિ ।
શેષપારમિતાપ્રાપ્તજિનપુત્રનિષેવિતે ॥ ૪॥

નમસ્તુતારહુઙ્કારપૂરિતાશાદિગન્તરે ।
સપ્તલોકક્રમાક્રા(ન્તે) અશેષકરુણા(ણે)ક્ષણે ॥ ૫॥

નમઃ શક્રાનલબ્રહ્મમરુદ્વિશ્વેશ્વરાર્ચિતે ।
ભૂતવેતાલગન્ધર્વગણયક્ષપુરસ્કૃતે ॥ ૬॥

નમઃ સ્ત્રદિતિ ફટ્કાર પરજત્ર(યન્ત્ર)પ્રમર્દિનિ ।
પ્રત્યાલીઢપદન્યાસે શિખી(ખિ)જ્વાલાકુલોજ્જ્વલે ॥ ૭॥

નમસ્તુરે મહાઘોરે માલવીરવિનાશિનિ ।
ભૃકુટીકૃતવક્ત્રાબ્જસર્વશત્રુનિસુન્દની(ષૂદિનિ) ॥ ૮॥

નમઃ સ્ત્રીરત્નમુદ્રાઙ્કહૃદયાઙ્ગુલિભૂષિતે ।
ભૂષિતાશેષદિક્ચક્રનિકરસ્વકરાકુલે ॥ ૯॥

નમઃ પ્રમુદિતાશેષમુક્તાક્ષીરપ્રસારિણિ ।
હસત્પ્રહસતુત્તારે મારલોલવશઙ્કુરિ ॥ ૧૦॥

નમઃ સમન્તભૂપાલપત(ટ)લાકર્ષણ(ણે)ક્ષણે ।

ચરભૃકુટિહૂઙ્કારસર્વાપદવિમોચની(ચિનિ) ॥ ૧૧॥

નમઃ શ્રીખણ્ડખણ્ડેન્દુ(સુ)મુક્તાભરણ(ણો)જ્જ્વલે ।
અમિતાભજિતાભારભાસુરે કિરણોદ્ધ્રુવે(દ્ધુરે) ॥ ૧૨॥

નમઃ કલ્પાન્તહુતભુગજ્વાલામાલાન્તરે(૨)સ્થિતે ।
આલીઢમુદિ(દ્રિ)તાબદ્ધરિપુચક્રવિનાશિની(નિ) ॥ ૧૩॥

નમઃ કરતરા(લા)ઘાટ(ત)ચરણાહતભૂતલે ।
ભૃકુટીકૃતહુઙ્કારસપ્તપાતાલભેદિની(નિ) ॥ ૧૪॥

નમઃ શિવે શુભે શાન્તે શાન્તનિર્વાણગોચરે ।
સ્વાહાપ્રણવસંયુક્તે મહાપાતકનાશની(શિનિ) ॥ ૧૫॥

નમઃ પ્રમુદિતાબદ્ધરિગાત્રપ્રભેદિનિ ।
દશાક્ષરપદન્યાસે વિદ્યાહુઙ્કારદીપિતે ॥ ૧૬॥

નમ(સ્તારે) તુરે પાદઘાતહુઙ્કારવીજિતે ।
મેરુમણ્ડલકૈલાશભુવનત્રયચારિણી(ણિ) ॥ ૧૭॥

નમઃ સુરે સ(શ)રાકારહરિણાઙ્કકરે(૨)સ્થિતે ।
હરિદ્વિરુક્તફટ્કાર(રે) અશેષવિષનાશિણી(નિ) ॥ ૧૮॥

નમઃ સુરાસુરગણયક્ષકિન્નરસેવિતે ।
અબુદ્ધમુદિતાભોગકરી(રિ) દુઃસ્વપ્નનાશિની(નિ) ॥ ૧૯॥

નમશ્ચન્દ્રાર્કસમ્પૂર્ણનયનદ્યુતિભાસ્વરે ।
તારાદ્વિરુક્તતુત્તારે વિષમજ્વલ(૨)નાશિનિ ॥ ૨૦॥

નમઃ સ્ત્રીતત્ત્વવિન્યાસે શિવશક્તિસમન્વિતે ।
ગ્રહવેતાર(લ)યક્ષોષ્મનાશિનિ પ્રવરે તુરે ॥ ૨૧॥

મન્ત્રમૂલમિદં સ્તોત્રં નમસ્કારૈકવિંશતિઃ(તિ) ।
યઃ પઠેત્પ્રાતઃ(પઠેત્ પ્રયતઃ) ધીમાન્ દેવ્યાભક્તિસમન્વિતે(તઃ) ॥ ૨૨॥

સાયં વા પ્રાતરુત્થાય સ્મરેત્ સર્વાભયપ્રદમ્ ।
સર્વપાપપ્રશમનં સર્વદુર્ગતિનાશનમ્ ॥ ૨૩॥

અભિષિક્તો ભવેત્ તૂર્ણં સપ્તભિર્જિનકોટિભિઃ ।
માસમાત્રેણ ચૈવાસૌ સુખં બૌદ્ધપદં વ્રજેત્ ॥ ૨૪॥

વિષં તસ્ય મહાઘોરં સ્થાવરં ચાથ જઙ્ગમમ્ ।
સ્મરણાન્ન પદં યાતિ ખાદિતં પિ(પી)તમેવ વા ॥ ૨૫॥

ગ્રહજો(જા)લવિષાર્તાનાં પરસ્ત્રીવિષનાશનમ્ ।
અન્યેષાં ચૈવ સત્ત્વાનાં દ્વિસપ્તમભિવર્તિતમ્ ॥ ૨૬॥

પુત્રકામો લભેત્ પુત્રં ધનકામો લભેદ્ધનમ્ ।
સર્વકામાનવાપ્નોતિ ન વિઘ્નૈઃ પ્રતિહન્યતે ॥ ૨૭॥

ઇતિ શ્રીસમ્યક્સમ્બુદ્ધવૈલો(રો)ચનભાષિતં ભગવત્યાર્યતારાદેવ્યા
નમસ્કારૈકવિંશતિનામાષ્ટોત્તરશતકં બુદ્ધભાષિતં પરિસમ્પૂર્ણમ્ ॥

---

*Aryataranamaskaraikavimshati Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*